**ख-विभाग:**

१. 'स्वप्नवासवदत्तम्' इति नाटकस्य चतुर्थाङ्कपर्यन्तं पद्मावत्या: चरित्रं यथोपन्यस्तं कविना, तथा स्वकीयभाषया निरूप्यताम्। 6

२. 'आगमप्रधानानि सुलभपर्य्यवस्थानानि महापुरुषहृदयानि भवन्ति' — कस्या इयमुक्ति:? कदा एवमुक्तम्? वाक्यस्यास्य तात्पर्य्यं व्याख्यायताम्। $\frac{1}{2}+1+3\frac{1}{2}$

३. अधोलिखितेषु प्रश्न**द्वयं** सुरगिरा देवनागर्य्या लिप्या च समाधेयम्। 2×2=4

क) 'अहो, अज्ञातवासोऽप्यत्र बहुगुण: सम्पद्यते' — इति वाक्यं कया उक्तम्? कदा चोक्तम्?

ख) 'पञ्चेषुर्मदनो यदा कथमयं षष्ठ: शर: पातित:' — इति पङ्के: तात्पर्य्यं लिख्यताम्।

ग) 'भर्त्तृस्नेहात् सा हि दग्धाप्यदग्धा' — कोऽत्र वक्ता? कदा एवमुक्तम्?



# Bachelor of Arts Examination, 2022

(1st Year, 2nd Semester)

## SANSKRIT (Honours)

### Course: IV

### [ Sanskrit Drama ]

Time : Two hours Full Marks : 30

*The figures in the margin indicate full marks.*

**क-विभाग:**

१. अधोलिखिता: प्रश्ना: सुरगिरा देवनागरीलिपिमाश्रित्य समाधेया:।

क) इदं किलाव्याजमनोहरं वपुस्तप:क्षमं साधयितुं य इच्छति।

ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥

केन चिन्तितमिदम्? अत्र नीलोत्पलपत्रधारया का तुल्यते? शमीलताछेदनरूपकार्यं केन सह तुल्यते? 'अव्याज' इति शब्दस्य कोऽर्थ:? $\frac{1}{2}+1+1+\frac{1}{2}$

ख) 'पतति परिणतारूणप्रकाश:

शलभसमूह इवाश्रमद्रुमेषु।' —

शलभेन सह क: तुल्यते? 'शलभ' इत्यस्य कोऽर्थ:? क: कुत्र पतति? $\frac{1}{2}+\frac{1}{2}+\frac{1}{2}+\frac{1}{2}$

२। अधोलिखितेषु **द्वयो:** व्याख्या कार्या — 5×2=10

क) न प्रभातरलं ज्योतिरुदेति वसुधातलात्।

ख) शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेज:।

ग) यान्त्येवं गृहिणीपदं युवतयो वामा: कुलस्याधय:।